



The following is a rare hymn on **Lord Vishnu** found in **Varaha Purana**, **Chapter 6.** The hymn is titled **Pundarikaksha Para Stotram** and was used by **Vasu** and **Raibhya** to attain liberation. This hymn is attributed to **Pushkara** where Lord Vishnu is worshipped in the form of Pundarikaksha. One who hears this hymn will get the same result as that of bathing in the sacred lake Pushkara.

धरण्युवाच -

पुण्डरीकाक्ष पारं तु स्तोत्रं देव कथं स्मृतम् ।
कीदृशं तन्ममाचक्ष्व परमेश्वर तत्त्वतः ॥ १ ॥

वाराह उवाच -

नमस्ते पुण्डरीकाक्ष नमस्ते मधुसूदन ।
नमस्ते सर्व लोकेश नमस्ते तिग्म चक्रिणे ॥ १ ॥

विश्वमूर्तं महाबाहुं वरदं सर्व तेजसम् ।
नमामि पुण्डरीकाक्षं विद्या ऽ विद्यात्मकं विभुम् ॥ २ ॥

आदिदेवं महादेवं वेद वेदाङ्ग पारगम् ।
गभीरं सर्व देवानां नमस्ये वारिजेक्षणम् ॥ ३ ॥

सहस्र शीर्षिणं देवं सहस्राक्षं महाभुजं ।
जगत् संव्याप्य तिष्ठन्तन् नमस्ये परमैश्वरम् ॥ ४ ॥

शरण्यं शरणं देवं विष्णुं जिष्णुं सनातनम् ।
नीलमेघ प्रतीकाशं नमस्ये चक्रपाणिनम् ॥ ५ ॥

शुद्धं सर्वगतं नित्यं व्योमरूपं सनातनम् ।
भावा ऽ भाव विनिर्मुक्तं नमस्ये सर्वगं हरिम् ॥ ६ ॥

नान्यत् किञ्चित् प्रपश्यामि व्यतिरिक्तं त्वयाच्युत ।
त्वन्मयञ् च प्रपश्यामि सर्वमेतच् चराचरम् ॥ ७ ॥

### ॥ फलश्रुतिः ॥

यश् चैतत् पुण्डरीकाक्ष पारगं शृणुयात् परम् ।
तस्य पुष्कर यात्रायां विधि स्नान फलं लभेत् ॥ ८ ॥

**॥ इति श्रीवाराहे पुराणे श्रीपुण्डरीकाक्ष पार स्तोत्रं सम्पूर्णम् ॥**